# Shri Hari Mangala Ashtakam

# શ્રીશાણ્ડિલ્યકૃતં શ્રીહરિમઙ્ગલાષ્ટકમ્

## Document Information

Text title : Shri Hari Mangala Ashtakam

File name : shANDilyakRRitaMshrIharimangalAShTakam.itx

Category : vishhnu, aShTaka, mangala

Location : doc_vishhnu

Proofread by : Manish Gavkar

Latest update : September 24, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# Shri Hari Mangala Ashtakam

## શ્રીશાણ્ડિલ્યકૃતં શ્રીહરિમઙ્ગલાષ્ટકમ્

શ્રીશાણ્ડિલ્ય ઉવાચ ।

અથ સ્તોત્રવરં દિવ્યં મઙ્ગાલાનાં ચ મઙ્ગલમ્ ।
શ્રીનન્દનન્દનહરેઃ કાલિન્દ્યા સમુદીરિતમ્ ॥ ૧॥

જય જયાજય મઙ્ગલશ્રુતિગણેન્દુમુખીવ્રજસંસ્તુત ।
જય જયાત્મપદામ્બુજસંશ્રિતનતસુરેન્દ્રમતાનુમહેન્દિર ॥ ૨॥

જય જયાજય મઙ્ગલમઙ્ગલવિકચનીલકુશેશયસુન્દર ।
વિધૃતકાઞ્ચનકાન્તનવામ્બર વિવિધભૂષણભૂષિતભૂષણ ॥ ૩॥

જય જયાજય મઙ્ગલમઙ્ગલ વિકચનીલકુશેશયસુન્દર ।
તવ યદાબ્જરજોઽભસિતા જનાઃ જગતિ મઙ્ગલ જયન્તિ શુચિપ્રભાઃ ॥ ૪॥

જય જયાજય મઙ્ગલમઙ્ગલ મુનિવરૈઃ પરિણૂત્તમહોદય ।
સકલવિશ્વકુલાનિ કુલાણુભિસ્તવ કૃતાનિ વદન્તિ મનીષિણઃ ॥ ૫॥

જય જયાજય મઙ્ગલમઙ્ગલ જયતિ મઙ્ગલમઙ્ગલમિદં તવ ।
તદનુ મઙ્ગલમેવ વિભૂષણં વર સુમાલ્યમુખં વિધૃતં વિભો ॥ ૬॥

જય જયાજય મઙ્ગલમઙ્ગલ વ્રજજનીવ્રજમઙ્ગલ નિજવ્રજમ્ ।
મુરલિકા મુકુટં લકુટં સ્રજઃ સકલમેવ વિભો તવ મઙ્ગલમ્ ॥ ૭॥

જય જયાજય મઙ્ગલમઙ્ગલ જગતિ તે ભવનં વિપિનં ગિરિઃ ।
સરિદલં વચનં ચરિતં શ્રુતં નિખિલમઙ્ગલમસ્તિ ન ચાપરમ્ ॥ ૮॥

જય જયાજય મઙ્ગલમઙ્ગલ કુરુ વિભો ભવમઙ્ગલમઙ્ગલમ્ ।
તવ મુખામ્બુજદર્શનતઃ પરં ભવતિ આર્ય સુમઙ્ગલમઙ્ગલમ્ ॥ ૯॥

ઇતિ શ્રીમઙ્ગલસ્તોત્રં હરેરદ્ભુતકર્મણઃ ।
પઠેદુષસિ યસ્તસ્ય મઙ્ગલં હ્યાષ્ટયામિકમ્ ॥ ૧૦॥

ઇતિ શ્રીશાણ્ડિલ્યસંહિતાયાં પઞ્ચમે ભક્તિખણ્ડે ષોડશોઽધ્યાયે

શ્રીહરિમઙ્ગલાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Manish Gavkar

---

*Shri Hari Mangala Ashtakam*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*